श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ शरणागतिस्तबकः पञ्चविंशः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ शरणागतिस्तबकः पञ्चविंशः ॥

दुग्धां दुग्धाम्बुधेः पुत्रि दुरितापहरा मम।
शार्ङ्गिणश्चरणाम्भोज शरणागति संपदम्॥ **25.1** ॥

धावन्तमुच्चतरदुर्विषयाटवीषु
सारङ्गशाबमिव शश्वदपाङ्गजालैः।
मामच्युतस्य महिषि प्रसभं गृहीत्वा
नित्यं विधेहि युवयोरनुकूलवृत्तिम्॥ **25.2** ॥

मातर्हिताहितविवेक विहीनमेनं
मन्दं मुकुन्दवरवर्णिनि मां जघन्यात्।
मार्गान्निवर्तयितुमर्हसि मङ्क्षु माता
कूपे निपित्सुमपि डिम्भमुपेक्षते किम्॥ **25.3** ॥

विश्वस्य धात्रि भवती परिपास्यतीति
विश्वस्य सम्यगभयं तु वयं चरामः।
निःश्रेयसं गमय वा निरयं नयेर्वा
कीर्तिं लभस्व यदि वा महतीमकीर्तिम्॥ **25.4** ॥

उच्चैरकृत्रिमगिरो यदि नाब्धिघोषाः
उन्मादिनां फणितयः स्मृतयश्च नो चेत्।
नारायणप्रणयिनीं नमतो मम त्वां
नैःश्रेयसी न भविता कथमम्ब संपत्॥ **25.5** ॥

गीतोपदेशगुरुपत्नि कृतागसो मे
    गोप्त्री त्वमेव भवताद्भवतापभाजः।
आत्मावनेऽप्यकुशलैरपरैः सुरैः किं
    बद्धः स्वयं किमु विमोचयिता बतान्यम्॥ **25.6** ॥

कर्माहृतिर्मतिरुपास्तिरिति प्रतीतैः
    मुक्तो मुरान्तक विलासिनि मुक्त्युपायैः।
अस्मादृशस्तव जगत्यनुकम्पनीयः
    नानापराधनिधिरम्ब न लभ्यतेऽन्यः॥ **25.7** ॥

पापोत्थकोप कलुषीकृतनाथचेतः
    पाथः प्रसादनविधौ कतकायितोक्तिम्।
योऽहं भवामि स भवन् यदुनाथयोषे
    तां त्वामनन्यशरणः शरणं प्रपद्ये॥ **25.8** ॥

निरतिशय विभूतेः देवि निष्किञ्चनोऽहं
    भवदवपरितप्तो भास्वरानन्दमूर्ते।
त्वदुपजनितबोधस्त्वज्जुषः कैटभारेः
    चरणनलिनयोर्मां तत्स्वमेवार्पयामि॥ **25.9** ॥

महति भवती मामार्याणां कुले समजीजनत्
    भवपथपरिश्रान्तच्छायातरूननयद् गुरून्।
शरणवरणं साङ्गं शौरावचीकरदिन्दिरे
    किमिह बहुना संपूर्णो मे चिरेण मनोरथः॥ **25.10** ॥

हृद्यं पद्यसहस्रमेतदनघं संशृण्वतः कम्पतां
    मोदेनादिमशाब्दिकस्य फणिनो मूर्ध्नां सहस्रं मुहुः।
तत्कालोचित चारुमारुतधुतत्वत्केलिगाढश्रमं
    प्रत्नं संप्रति मे प्रसीदतु रमे पक्षीन्द्रवाहं महः॥ **25.11** ॥

येयं नाद्रियते कृतिः कतिपयैरीर्ष्यागृहीतैर्जनैः
चित्रं सैव विपश्चितामकलुषे चित्ते विधत्ते मुदम्।
विश्वस्याम्ब मनो दुनोति दयिताविश्लेषिणां या नृणां
नो किं कोकिलकाकली भवति सा तोषाय योषाजुषाम्॥ **25.12** ॥

बहुस्तबकभासुरस्तव नवस्स्तवस्स्वस्तरुः
प्रशस्त विबुधस्तुतस्त्रियुगनायिके वस्तुतः।
समस्तमपि वाञ्छितं वितनुते सदानन्दन -
स्थितिः सुरभिलैः रसैरपि दिशो दशामोदयन्॥ **25.13** ॥

श्लोकाः श्लाघावसरतरलीभूतवेधःपुरन्ध्री -
चूडागुच्छप्रसृमरमधुस्रोतसा जातसाम्यः।
विश्वाम्ब त्वद्गुणपरिचये वीततन्द्रान् सुधीन्द्रान्
प्रीणन्त्येते मम परमनोभैरवा धीरवादाः॥ **25.14** ॥

अम्ब त्वद्गुणलेशपेशलमिदं डिम्भस्य मे जल्पितं
साकं लोकपतिस्त्वया निशमयन्नाकं विधातुः पदम्।
मोक्षं चाननुरूपमेव गणयन् मोदाद् महौदार्यवान्
मन्ये सम्प्रति पारितोषिकमसावन्वेषतेऽयं हरिः॥ **25.15** ॥

समस्त गुणशेवधेरमृतकल्पसूक्तेस्तव
स्तवस्य परिशीलनात् फलमुपैति यः प्रार्थितम्।
लभेत यदि वेतनं सुरभिदुग्धदोहाज्जनः
स काममुपमीयते जननि तेन नैवेतरः॥ **25.16** ॥

सानन्दं ये सरसमनसः स्वादु लक्ष्मीसहस्रं
जेगीयन्ते जगति जनितश्रीनिवासप्रसादम्।
शान्तत्रासां विततिममितां शर्मणां निर्मिमाणा
तेषामेषा विहरतितरामिन्दिरा मन्दिरेषु॥ **25.17** ॥

**पौत्रेणात्रेयगोत्राभरणनयचण श्रीनिवासाध्वरीन्दोः**
**श्रीमद्रामाङ्घ्रिभक्तिप्रमुदित रघुनाथार्ययज्वात्मजेन।**
**वेदान्ताचार्यपादाम्बुजनिहितहृदा वेङ्कटार्येण क्लृप्तं**
**रम्यं लक्ष्मीसहस्रं पठत दृढतरं नित्यकल्याणकामाः॥ 25.18 ॥**

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे शरणागतिस्तबकः पञ्चविंशः॥